'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 6th Semester Examination, 2024

## DSE-P3-SANSKRIT (603)

Time Allotted: 2 Hours — Full Marks: 60

*The figures in the margin indicate full marks.*

**The question paper contains DSE-3A and DSE-3B.**
**Candidates are required to answer any *one* from the *two* papers and they should mention it clearly on the Answer Book.**

## DSE-3A

1. संस्कृतभाषया देवनागरीलिप्या च ***द्वयोः*** प्रश्नयोः उत्तरं प्रदेयम् — 12×2 = 24

(क) ब्राह्मणादिवर्णानां सृष्टिः कथमभवत्-विषयमेतत् सविस्तारम् आलोच्य तेषु ब्राह्मणस्य श्रेष्ठत्वं प्रतिपादयत।

(ख) मनुसंहितामवलम्ब्य जगतः सृष्टिप्रक्रिया विस्तारेण व्याख्येया।

(ग) मनुसंहितायां प्रथमाध्याये मनुष्येतरजातीनाम् उत्पत्तिः आलोचनीया।

2. संस्कृतभाषया देवनागरीलिप्या च ***एकस्य*** व्याख्या कार्या — 6×1 = 6

(क) कालं कालविभक्तीश्च नक्षत्राणि ग्रहांस्तथा।
सरितः सागरान् शैलान् समानि विषमानि च॥

(ख) यत्तत् कारणमव्यक्तं नित्यं सदसदात्मकम्।
तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते॥

3. बङ्गभाषया आङ्गलभाषया च अनुवादः कार्यः (***द्वयोः***) — 6×2 = 12

(क) आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः॥

(ख) सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः।
अप एव ससर्जादौ तासुबीजमवासृजत्॥

(ग) तपो वाचं रतिञ्चैव कामञ्च क्रोधमेव च।
सृष्टिं ससर्ज चैमां स्रष्टुमिच्छन्निमाः प्रजाः॥

4. संस्कृतभाषया देवनागरीलिप्या च टिप्पणी लेखनीया (***चतुर्णाम्***) — 3×4 = 12

स्वयम्भूः, त्रिगुणम्, धर्मस्वरूपम्, पञ्चमहाभूतानि, सन्ध्यांशः, नारायणः, वनस्पतिः।

Maynaguri College Library

5. संस्कृतभाषया देवनागरीलिप्यां ***षण्णां*** संक्षिप्तोत्तरं प्रदेयम् — 1×6 = 6

(क) किं नाम हव्यम् ?

(ख) कर्मेन्द्रियाणि कानि ?

(ग) कस्माद् आप उत्पद्यन्ते ?

(घ) मनुष्यः कदा नीरोगः भवेत् ?

(ङ) मनुसंहिता शास्त्रेषु कस्यां श्रेण्याम् अन्तर्भुक्ता भवति ?

(च) देवानां युगं कियद् वर्ष-कालम् ?

(छ) मनुना सृष्टाः दशप्रजापतयः के ?

(ज) प्रथमपुरुषरूपेण क आविर्भूतोऽभवत् ?

(झ) के तावत् अहोरात्रवेत्तारः ?

## DSE-3B

## Unit-I

1. संस्कृतभाषया देवनागरीलिप्या च ***एकस्योत्तरं*** प्रदेयम् — 12×1 = 12

(क) चित्रग्रीव-हिरण्यककथामालोच्य तस्याः उपदेशः व्याख्येयः।

(ख) "नारीणां दूषणानि षट्"– चन्दनदास-लीलावतीकथामधिकृत्य आलोच्यताम्।

2. वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः ***(द्वयोः)*** — 3×2 = 6

(क) अनभ्यासे विषं विद्या अजीर्णे भोजनं विषम्।
विषं सभा दरिद्रस्य वृद्धस्य तरुणी विषम्॥

(ख) मातृवत् परदारेषु परद्रव्येषु लोष्ट्रवत्।
आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः॥

(ग) न हि तद्विद्यते किञ्चिद्यदर्थेन न सिध्यति।
यत्नेन मतिमांस्तस्मादर्थमेकं प्रसाधयेत्॥

3. संस्कृतभाषया देवनागरीलिप्या च ***एकस्य*** व्याख्या कार्या — 6×1 = 6

(क) यस्य मित्रेण संभाषा यस्य मित्रेण संस्थितिः।
यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान्॥

(ख) शरीरस्य गुणानां च दूरमत्यन्तमन्तरम्।
शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः॥

4. संस्कृतभाषया देवनागरीलिप्या ***षण्णां*** संक्षिप्तोत्तरं प्रदेयम् — 1×6 = 6

(क) कीदृशं दानं सफलं भवति ?

(ख) विद्या किं ददाति ?

(ग) के सन्ति षड्दोषाः ?

(घ) धर्मलाभस्य उपायः कः ?

Maynaguri College Library

(ङ) केषु विश्वासः न कर्तव्यः ?

(च) "हितोपदेशः" इति ग्रन्थस्य ग्रन्थकारः कः ?

(छ) कस्य संसर्गेण मूर्खोऽपि पाण्डित्यमर्जितवान् ?

(ज) चतुर्वर्गाणां नामानि कानि ?

## Unit-II

5. संस्कृतभाषया देवनागरीलिप्या च ***एकस्योत्तरं*** प्रदेयम् — 12×1 = 12

(क) पञ्चतन्त्रमधिकृत्य सिंह-शशककथा आलोच्यताम्।

(ख) पञ्चतन्त्रस्य मित्रभेदांशे वक-कर्कट कथा स्वभाषया व्याख्यायताम्।

6. वङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः (***द्वयोः***) — 3×2 =6

(क) आरोहति न यः स्वस्य वंशस्याग्रे ध्वजो यथा।
परिवर्तिनि संसारे मृतः को वा न जायते॥

(ख) पूज्यते यदपूज्योऽपि यदगम्योऽपि गम्यते।
वन्द्यते यदवन्द्योऽपि स प्रभावो धनस्य च॥

(ग) अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति।
स एव निधनं याति कीलोत्पाटीव वानरः॥

7. संस्कृतभाषया देवनागरीलिप्या च ***एकस्य*** व्याख्या कार्या — 6×1 = 6

(क) इह लोके हि धनिनां परोऽपि स्वजनायते।
स्वजनोऽपि दरिद्राणां सर्वदा दुर्जनायते॥

(ख) भये वा यदि वा हर्षे संप्राप्ते यो विमर्शयेत्।
कृत्यं न कुरुते वेगान् न स संतापमाप्नुयात्॥

8. संस्कृतभाषया देवनागरीलिप्या च ***षण्णां*** संक्षिप्तोत्तरं प्रदेयम् — 1×6 = 6

(क) सञ्जीवकः कः ?

(ख) पञ्चतन्त्रे कति कथाः सन्ति ?

(ग) नीलवर्ण-श्रृगालस्य नाम किम् ?

(घ) क आसीत् महिलारोप्य-नगरस्य राजा ?

(ङ) 'पञ्चतन्त्रम्' इति नामकरणस्य कारणं किम् ?

(च) विष्णुशर्मा किमर्थं पञ्चतन्त्रं रचितवान् ?

(छ) पिङ्गलकः कस्य नाम ?

(ज) के आसन् मदोत्कटस्य अनुचराः ?

(झ) वर्धमाननगरस्य पुरोनायकस्य नाम किमासीत् ?

——×——



Maynaguri College Library